FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

ई) स्मृतिभिन्नमोहतमसो दिष्ट्या प्रमुखे स्थितासि मे सुमुखि।
उपरागान्ते शशिनः समुपगता रोहिणी योगम्॥

10. बाणमहाकविना वर्णितानुसारं शूद्रकवैशम्पायनयोः सम्भाषणं विवृणुत।

अथवा

सूर्यनारायणशास्त्रिणा वर्णितानुसारं सहेतुकं रामदासस्य जीवनसरणिं लिखत।

11. गुरुः शिष्यान् किम् अनुशास्ति?

अथवा

ब्रह्मविद्यारूपिण्या हैमवत्या देवेभ्यः दत्तम् उपदेशं विवृणुत।

12. अधो निर्दिष्टेषु द्वयोः परिचयं लिखत-

अ) कौटिल्यः आ) भरतमुनिः इ) माघः ई) श्रीहर्षः

13. अधो निर्दिष्टेषु द्वयोः सर्वासु विभक्तिषु सर्वेषु च वचनेषु शब्दरूपाणि लिखत-

अ) जलमुक् आ) भवत् इ) नामन् ई) वाक्

*********************************************

www.FirstRanker.com

FirstRanker.com
Firstranker's choice
www.FirstRanker.com www.FirstRanker.com

4. अप्रस्तुतप्रशंसालंकारस्य लक्ष्यलक्षणसमन्वयं कुरुत।

5. जलमुचे, वाक्षु, नाम्ने, विदुषि इत्येतेषां लिङ्गविभक्तिवचनानि प्रत्यभिजानीत।

6. क्षिप्रं प्रसादयति सम्प्रति कोपि तानि कान्तामुखानि रतिविग्रहकोपितानि।
उत्कण्ठयन्ति पथिकांजलदास्स्वनन्तः शोकोऽभिवर्धयति तद्वनितास्स्वनन्तः॥
इतिश्लोकस्य भाषान्तरीकरणं कुरुत।

7. महाकविकालिदासः कति ग्रन्थान् अरचयत्? तानि कानि? विवृणुत।

8. दृष्टान्तालंकारस्य लक्ष्यलक्षणसमन्वयं कुरुत।

## आ विभागः

सर्वे प्रश्नाः समाधेयाः। 5X12=60

9. द्वयोः श्लोकयोः प्रतिपदार्थं तात्पर्यार्थं च लिखत।

अ) स्वायम्भुवान्मरीचेर्यः प्रबभूव प्रजापतिः।
सुरासुरगुरुः सोऽत्र सपत्नीकस्तपस्यति॥

आ) भवनेषु रसाधिकेषु पूर्वं क्षितिरक्षार्थमुशन्ति ये निवासम्।
नियतैकयतिव्रतानि पश्चात्तरुमूलानि गृहीभवन्ति तेषाम्॥

इ) उदेति पूर्वं कुसुमं ततः फलं घनोदयः प्राक् तदनन्तरं पयः।
निमित्तनैमित्तिकयोरयं क्रमस्तव प्रसादस्य पुरस्तु सम्पदः॥

www.FirstRanker.com